ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥
शिक्षा घ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥
उदात्तमाख्याति वृषोऽङ्गुलीनां
प्रदेशिनीमूलनिविष्टमूर्द्धा ।
उपान्तमध्ये स्वरितं धृतञ्च
कनिष्ठिकायामनुदात्तमेव ॥
उदात्त प्रदेशिनीं विद्यात्प्रचयं मध्यतोऽङ्गुलिम् ।
निहतन्तु कनिष्ठिक्यां स्वरितोपकनिष्ठिकाम् ॥
अन्तोदात्तमाद्युदात्तमुदात्त-
मनुदात्तं नीचस्वरितम् ।
मध्योदात्तं स्वरितं द्व्युदात्तं
त्र्युदात्तमिति नव पदशय्या ॥
अग्निः सोमः प्र वो वीर्य्यं हविषां
स्वर्बृहस्पतिरिन्द्राबृहस्पती ।
अग्निरित्यन्तोदात्तं सोम इत्याद्युदात्तं प्र इत्यनु-
दात्तं व इत्यनुदात्तं वीर्य्यं नीचस्वरितम् ॥
हविषां मध्योदात्तं स्वरिति स्वरितम् । बृहस्पति-
रिति द्व्युदात्तमिन्द्राबृहस्पती इति त्र्युदात्तम् ॥
अनुदात्तो हृदि ज्ञेयो मूर्द्ध्न्युदात्त उदाहृतः ।
स्वरितः कर्णमूले तु सर्व्वास्ये प्रचयः स्मृतः ॥
चाषस्तु वदते मात्रां द्विमात्रान्त्वेव वायसः ।
शिखी रौति त्रिमात्रन्तु नकुलस्त्वर्द्धमात्रकम् ॥
कुतीर्थादागतं दग्धमपवर्णञ्च भक्षितम् ।
न तस्य पाठे मोक्षोऽस्ति पापाहेरिव किल्वि-
षात् ॥
सुतीर्थादागतं व्यक्तं स्वाम्नाय्यं सुव्यवस्थितम् ।
सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते ॥
मन्त्रो हीनः स्वरतो वर्णतो वा
मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥
अनक्षरं हतायुष्यं विस्वरं व्याधिपीड़ितम् ।
अक्षता शस्त्ररूपेण वज्रं पतति मस्तके ॥
हस्तहीनन्तु योऽधीते स्वरवर्णविवर्ज्जितम् ।
ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति ॥
हस्तेन वेदं योऽधीते स्वरवर्णार्थसंयुतम् ।
ऋग्यजुःसामभिः पूतो ब्रह्मलोके महीयते ॥
शङ्करः शाङ्करीं प्रादाद्दाक्षीपुत्राय धीमते ।
वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः ॥
येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥
येन धौता गिरः पुंसां विमलैः शब्दवारिभिः ।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥
अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः ॥
त्रिनयनमुखनिःसृतामिमां य
इह पठेत् प्रयतश्च सदा द्विजः ।
स भवति धनधान्यपशुपुत्त्रकीर्त्तिमा-
नतुलञ्च सुखं समश्नुते दिवीति दिवीति ॥
अथ शिक्षामात्मोदात्तश्च हकारं स्वराणां
यथा सौराष्ट्रिका । नीत्यक्षोस्पृष्टोदात्तं चाषस्तु
शङ्कर एकादश ॥" इति वेदशिक्षासमाप्तिम-
गमत् ॥ * ॥ अपि च ।

अग्निरुवाच ।

"वक्ष्ये शिक्षां त्रिषष्टिः स्युर्व्वर्णा वा चतुरा-
धिकाः ।
स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः ॥
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः ।
अनुस्वारो विसर्गश्च × क $\times$ पौ चापि परा-
श्रितौ ॥
दुःस्पृष्टश्चेति विज्ञेयः लृकारः प्लुत एव च ।
रङ्गश्च खे अरां इव हकारः पञ्चमैर्युतः ॥
अन्तस्थाभिः समायुक्तः औरस्यः कण्ठ्य
एव सः ।
आत्मा बुद्ध्या समेत्यार्थं मनो युङ्क्ते विवक्षया ॥
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ।
मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम् ॥
प्रातःसवनयोगन्तं छन्दो गायत्त्रमाश्रितम् ।
कण्ठे माध्यन्दिनयुतं मध्यमं त्रैष्टभानुगम् ॥
तारं तार्त्तीयसवनं शीर्षण्यं जगतानुगम् ॥
सोदीर्णो मूर्द्ध्न्यभिहतो वक्त्रमापद्य मारुतः ॥
वर्णान् जनयते तेषां विभागाः पञ्चधा स्मृताः ।
स्वरः कालतः स्थानात् प्रयत्नानुप्रदानतः ॥
अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वामूलञ्च दन्ताश्च नासिकोष्ठौ च तालु च ॥
ओ-भावश्च विवृत्तिश्च श-ष-सा रेफ एव च ।
जिह्वामूलमुपधा च गतिरष्टविधोष्मणः ॥
यद्योभावप्रसन्धानमुकारादिपरं पदम् ।
स्वरान्तं तादृशं विद्यात् यदन्यद्व्यक्तमूष्मणः ॥
कुतीर्थादागतं दग्धमपवर्णञ्च भक्षितम् ।
एवमुच्चारणं पापमेवमुच्चारणं शुभम् ॥
सुतीर्थादागतं द्रव्यं स्वाम्नार्थं सुव्यवस्थितम् ।
सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते ॥
न करालो न लम्बोष्ठो नाव्यक्तो नानुनासिकः ।
गद्गदोबद्धजिह्वश्च न वर्णान् वक्तुमर्हति ॥
उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः ।
ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि ॥
कण्ठ्यावहा वि-चु-य-शास्तालव्या ओष्ठजावुपू ।
स्युर्मूर्द्धन्या ऋ-टु-र-षा दन्त्या लृ-तु-ल-साः
स्मृताः ॥
जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यो वः स्मृतो
बुधैः ।
एऐ तु कण्ठ्यतालव्यौ ओ औ कण्ठ्योष्ठजौ
स्मृतौ ॥
अर्द्धमात्रा तु कण्ठ्या स्यात् एकारैकारयोर्भवेत् ।
अयोगवाहा विज्ञेया आश्रयस्थानभागिनः ॥
अचोऽस्पृष्टा यणस्त्वीषन्नमस्पृष्टाः शरः स्मृताः ।
शेषाः स्पृष्टा हलः प्रोक्ता निबोधानुप्रदानतः ॥
यमोऽनुनासिका न ह्रो नादिनो ह झषः स्मृताः ।
ईषन्नादा यणो जश्च श्वासिनश्च खफादयः ।
ईषच्छ्वासांश्चरो विद्याद्गोर्धामैतत् प्रचक्षते ॥"
इत्याग्नेये महापुराणे शिक्षानिरूपणं नाम
३३६ अध्यायः ॥

शिक्षाकरः, पुं, (करोतीति । कृ + अच् । शिक्षायाः
करः । ) व्यासः । इति शब्दमाला ॥ शिक्षा-
कर्त्तरि, त्रि ॥

शिक्षागुरुः, पुं, (शिक्षाया गुरुः ।) विद्यादाता
गुरुः । मन्त्राद्युपदेशकर्त्ता दीक्षागुरुः । यथा ।
इयं हि रसभावविशेषदीक्षागुरोर्विक्रमादित्य-
स्याभिरूपभूयिष्ठा परिषत् । इत्यभिज्ञान-
शकुन्तलायाम् १ अङ्कः ॥

शिक्षितः, त्रि ( शिक्ष + क्तः । ) विज्ञः । इत्य-
मरः ॥ शिक्षायुक्तः । यथा,—
"आपरितोषाद्विदुषां न साधु मन्ये प्रयोगवि-
ज्ञानम् ।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ॥"
इत्यभिज्ञानशकुन्तलायाम् १ अङ्कः ॥

शिक्षिताक्षरः, पुं, (शिक्षितानि अक्षराणि येन ।)
शिक्षाकारी । छात्रः । यथा,—
"स्यादक्षरमुखः कालाक्षरिकः शिक्षिताक्षरः ।"
इति त्रिकाण्डशेषः ॥
(शिक्षिते, त्रि । यथा, राजतरङ्गिण्याम् ।५।८३।
"स सुय्यनामा मतिमान् शबुद्धः शिक्षिता-
क्षरः ।
कस्याप्यासीद्गृहपतेरर्भकाध्यापको गृहे ॥")

शिक्षकः, पुं, लेखकः । इति संक्षिप्तसारोणादि-
वृत्तिः ॥

शिखण्डः, पुं, मयूरपुच्छः । इत्यमरः यथा,
"शिखण्डोऽस्त्री पिच्छबर्हे शिखिपुच्छशिख-
ण्डके ।"
इति शब्दरत्नावली ॥
(यथा, महाभारते । १२ । २८१ । ५८ ।
"वृत्रस्य रुधिराच्चैव शिखण्डाः पार्थ जज्ञिरे ।
द्विजातिभिरभक्ष्यास्ते दीक्षितैश्च तपोधनैः ॥")
चूड़ा इति मेदिनी ॥

शिखण्डकः, पुं, (शिखण्ड इव । कन् । ) काक-
पक्षः । इत्यमरः जुल्फी इति भाषा । "द्वे
क्षत्त्रियकुमाराणां शिखावये । उक्तञ्च ।
'बालानाञ्च शिरः कार्य्यं त्रिशिखं मुण्डमेव
चेति ।'
शिखापञ्चके इत्यन्ये । सामान्येन चूड़ाया-
मित्यन्ये । काकपक्षाकारत्वात् काकपक्षः ।
शिरसि खण्डते शिखण्डकः मनीषादिः ताल-
व्यादिः शिखण्डे तु शिखावर्हे इति तालव्यादौ
रभसः । शिखाण्डकश्च । शिखण्डकशिखाण्डका-
विति वाचस्पतिः ।' इति तट्टीकायां भरतः ॥
( यथा, रघुः । ११ । ५ ।
"तौ पितुर्नयनजेन वारिणा
किञ्चिदुक्षितशिखण्डकावुभौ ।
धन्विनौ तमृषिमन्वगच्छतां
पौरदृष्टिकृतमार्गतोरणौ ॥")
मयूरपुच्छे, क्लौ च । इति शब्दरत्नावली ॥

शिखण्डिकः, पुं, (शिखण्डीव कायति शब्दायते
इति । कै + कः । यद्वा, शिखण्डोऽस्यास्तीति ।
शिखण्ड + ठन् ।) कुक्कुटः । इति हेमचन्द्रः ॥